# shrIbhujangaprayAtAShTakam

# શ્રીભુજઙ્ગપ્રયાતાષ્ટકમ્

## Document Information

Text title : bhujangaprayAtAShTakam

File name : bhujangaprayAtAShTakam.itx

Category : aShTaka, vishhnu, krishna, bhujanga, vishnu, puShTimArgIya

Location : doc_vishhnu

Author : Hariraya

Proofread by : PSA Easwaran

Description/comments : puShTimArgIya stotraratnAkara

Latest update : May 17, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીભુજઙ્ગપ્રયાતાષ્ટકમ્

સદા ગોપિકામણ્ડલે રાજમાનં લસન્નૃત્યબન્ધાદિલીલાનિદાનમ્ ।
ગલદ્દર્પકન્દર્પશોભાભિદાનં ભજે નન્દસૂનું સદાનન્દરૂપમ્ ॥ ૧॥

વ્રજસ્ત્રીજનાનન્દસન્દોહસક્તં સુધાવર્ષિવંશીનિનાદાનુરક્તમ્ ।
ત્રિભઙ્ગાકૃતિસ્વીકૃતસ્વીયભક્તં ભજે નન્દસૂનું સદાઽઽનન્દરૂપમ્ ॥ ૨॥

સ્ફુરદ્રાસલીલાવિલાસાતિરમ્યં પરિત્યક્તગેહાદિદાસૈકગમ્યમ્ ।
વિમાનસ્થિતાશેષદેવાદિનમ્યં ભજે નન્દસૂનું સદાઽઽનન્દરૂપમ્ ॥ ૩॥

સ્વલીલારસાનન્દદુગ્ધોદમગ્નં પ્રિયસ્વામિનીબાહુકણ્ઠૈકલગ્નમ્ ।
રસાત્મૈકરૂપાઽવબોધં ત્રિભઙ્ગં ભજે નન્દસૂનું સદાઽઽનન્દરૂપમ્ ॥ ૪॥

રસામોદસમ્પાદકં મન્દહાસં કૃતાભીરનારીવિહારૈકરાસમ્ ।
પ્રકાશીકૃતસ્વીયનાનાવિલાસં ભજે નન્દસૂનું સદાઽઽનન્દરૂપમ્ ॥ ૫॥

જિતાનઙ્ગસર્વાઙ્ગશોભાભિરામં ક્ષપાપૂરિતસ્વામિનીવૃન્દકામમ્ ।
નિજાધીનતાવર્તિરામાતિવામં ભજે નન્દસૂનું સદાઽઽનન્દરૂપમ્ ॥ ૬॥

સ્વસઙ્ગીકૃતાઽનન્તગોપાલબાલં વૃતસ્વીયગોપીમનોવૃત્તિપાલમ્ ।
કૃતાનન્તચૌર્યાદિલીલારસાલં ભજે નન્દસૂનું સદાનન્દરૂપમ્ ॥ ૭॥

ધૃતાદ્રીશગોવર્ધનાધારહસ્તં પરિત્રાતગોગોપગોપીસમસ્તમ્ ।
સુરાધીશસર્વાદિદેવપ્રશસ્તં ભજે નન્દસૂનું સદાઽઽનન્દરૂપમ્ ॥ ૮॥

॥ ઇતિ શ્રીહરિરાયવિરચિતં ભુજઙ્ગપ્રયાતાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*